A

**SAMAGRA SHIKSHA, KERALA**

**SUMMATIVE ASSESSMENT-II - 2025-26**

First Language Part I- Paper-I

**SANSKRIT**

(For Academic and Oriental Sanskrit Schools)

811

**Time 1 ½ Hours** | **Class- VIII**

**Cool of time - 15. Minutes** | **Max Score - 40**

निर्देशाः -

- 15 निमेषाः समाश्वासकालः ।
- प्रश्नान् निर्देशान् च सम्यक् अवगम्य एव उत्तराणि लेखनीयानि ।
- उत्तरलेखने मूल्याङ्काः कालः च परिगणनीयाः।
- विवर्तनप्रश्नाद् ऋते सर्वेषां प्रश्नानाम् उत्तरलेखने देवनागरीलिपिरुपयोक्तव्या ।

## भागः - 1

1. **अधोदत्तेभ्यः गणेभ्यः विभिन्नार्थकं गणं चित्वा लिखत ।** (1)

   क) अर्जुनः - पार्थः।  ख) चक्रायुधः - श्रीकृष्णः ।

   ग) घटोत्कचः - भीमसेनपुत्रः ।  घ) चक्रपाणिः - धृतराष्ट्रः ।

2. **अधोदत्तपट्टिकां पठित्वा उचितरूपेण युक्तं गणं चित्वा लिखत ।** (1)

| | |
|---|---|
| १ लट् | अ) पठिष्यति । |
| २ लोट् | आ) पठति । |
| ३ लृट् | इ ) पठतु । |

   क) १ - अ  २ - इ  ३ - आ  ख) १ - आ  २ - इ  ३ - अ

   ग) १ - आ  २ - अ  ३ - इ  घ) १ - इ  २ - अ  ३ - आ

3. **वाक्यद्वयं पठत । अधस्तात् उचितम् उत्तरं किमिति लिखत ।** (1)

   १) धृतराष्ट्रः दुर्योधनस्य पिता भवति ।

   २) अभिमन्युः दुर्योधनस्य पुत्रः भवति ।

   क) १ साधु, २ असाधु ।  ख) १ असाधु , २ साधु ।

   ग) १ , २ असाधु ।  घ) १ , २ साधु ।

4. **सर्वेषाम् अभिप्रायस्वातन्त्र्यं वर्तते । अत्र कः मनोभावः ?** (1)

   क ) स्वार्थता ।  ख) समत्वम् ।

   ग) असूया ।  घ) असहिष्णुता ।

## भागः - 2

**5. श्लोकं पठित्वा गद्यक्रमं लिखत।** **(2)**

गुरोरनुज्ञामधिगम्य भूयः
समेत्य कैलासगिरेः समीपम्।
हरं समाराधयितुं यतात्मा
धनञ्जयस्तत्र तपश्चकार॥

**गद्यक्रमः-** गुरोः ...... अधिगम्य यतात्मा ....... कैलासगिरेः ....... समेत्य हरं ........... तत्र तपः चकार।

**6. अधोदत्तवाक्यं पठित्वा णिजन्तद्वयं चित्वा लिखत।** **(2)**

अध्यापिका सुभाषितं श्रावयति। ततः पाठयति।

**7. संख्यारूपेण अक्षररूपेण च लिखत।** **(2)**

**क)** 258 - .................................... ।

**ख)** ......... - अष्टपञ्चाशदधिकत्रिशतम्।

**8. वाक्यानि पठित्वा आरोग्यसंरक्षणे कर्तव्यानि अकर्तव्यानि च विवेचयत।** **(2)**

**मादकवस्तूनाम् उपयोगं करोति।** **प्रतिदिनं व्यायामं करोति।**

**पर्याप्तं जलं पिबति।** **अतिशीतलभोज्यानि खादति।**

| कर्तव्यानि | अकर्तव्यानि |
|---|---|
| पर्याप्तं जलं पिबति। | अतिशीतलभोज्यानि खादति। |
| ........................................ | ........................................ |

**9. (I) उदाहरणानुसारम् एकपदं लिखत।** **(2)**

**उदाः-** जलं ददाति इति जलदः।

१. पयः ददाति इति .........।

२. वारि ददाति इति ........।

**अथवा**

**(II) उदाहरणानुसारं वाक्यं परिवर्तयत।**

**उदा -** बालकः क्रीडाङ्कणं याति। सः क्रीडति।

बालकः क्रीडितुं क्रीडाङ्कणं याति।

**क)** रोय् विद्यालयं गच्छति। सः पठति।

10. उचितम् आशयं चित्वा लिखत । (2)

फलेन पर्णेन जलेन वायुना
स्थितिं शरीरस्य स कल्पयन् क्रमात् ।
उपोढकार्श्योऽधिकनिर्मलोऽन्वहं
बभूव पक्षे बहुले यथा शशी ॥

**क)** अर्जुनः हरम् आराधयितुं तपश्चकार ।

**ख)** चन्द्रः इव अधिकनिर्मलः बभूव ।

**ग)** अर्जुनमधिकृत्य पार्वती शिवं विज्ञापयामास ।

**11. उदाहरणानुसारं समानसन्धियुक्तपदं वाक्यात् स्वीकृत्य पदच्छेदं कुरुत ।** (2)

क्षत्रियाणां विनाशः उपस्थितः इत्यवगच्छ । नृपतिशतवधेन भूमेः लाघवं चास्तु ।

**उदा** - इत्यवगम्य - इति + अवगम्य ।

**क)** ...................... - ....................+ ................. ।

**उदा** - मास्तु - मा + अस्तु ।

**ख)** ...................... - ..................+ ................. ।


**12. उचितं विग्रहवाक्यं लिखत ।** (3)

( अधिकनिर्मलः, गिरीश :, अनन्यदैवतम्, महर्षिः )


**क )** गिरेः ईशः । **ख )** महान् च असौ ऋषिः च । **ग)** अधिकतया निर्मलः ।

**13. उदाहरणानुसारं वाक्यं विपुलीकुरुत ।** (3)

**उदा-** [धावति, हरिणः, शीघ्रम् ]




**क)** [गायति, पिकः , मधुरम् ]



14. प्रादेशिकभाषया विवर्तयत। (4)

अस्माकं देशः विविधैः कलारूपैः सम्पुष्टः भवति । आनन्दप्राप्तिः एव आस्वादनस्य परमं लक्ष्यम् । केरलेषु प्रसिद्धानि प्रादेशिककलारूपाणि भवन्ति तेय्यं, पटयणि, मङ्गलंकलि, मरुत्तुकलि, कलंपाट्ट् इत्यादीनि । गोत्रकलाविभागेषु प्रसिद्धं भवति उत्तरकेरलेषु प्रचाल्यमानं गद्दिकाकलारूपम् ।

15. (I) कविताभागं पठित्वा अधोदत्तप्रश्नानाम् उत्तराणि लिखत। (4)

श्यामपयोदो मुक्तकनीरै-
रवनिं तोषयति ।
पङ्किलपादो नाकसमानं
कुरुते ग्राममुम् ।

क ) एकं क्रियापदं चित्वा लिखत।

ख ) कः नाकसमानं कुरुते ?

ग ) स्वर्गः इत्यर्थकं पदं किम् ?

घ) श्यामपयोदः किं तोषयति ?

अथवा

(II) खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

संस्कृतनाटककारेषु प्रमुखः भवति महाकविः भासः। तेन त्रयोदश नाटकानि विरचितानि सन्ति। तेषु अन्यतमं भवति दूतघटोत्कचम्। कौरवभवने घटोत्कचस्य दूतप्रस्तुतिरेव नाटकस्यास्य प्रतिपाद्यविषयः। अस्मिन् नाटके एक एव अङ्कः विद्यते।

क ) संस्कृतनाटककारेषु प्रमुखः कः ?

ख) तेन कति नाटकानि विरचितानि सन्ति ?

ग ) नाटकस्य अस्य प्रतिपाद्यविषयः कः ?

घ) दूतघटोत्कचे कति अङ्काः विद्यन्ते ?

16. (I) "समत्वम्" अधिकृत्य सूचनानुसारं टिप्पणीं लिखत। (4)

सूचनाः - भारतम् - जनायत्तराष्ट्रम् - भरणसंविधानम् - अम्बेद्करः - सर्वे समानाः - अभिप्रायस्वातन्त्र्यम्।

अथवा

(II) सूचनानुसारं घटोत्कचस्य कथापात्रनिरूपणं कुरुत ।

श्रद्धेयाः अंशाः -- भासः - दूतघटोत्कचम् - भीमसेनपुत्रः - धीरो दूतः

- आज्ञानुवर्ती - अर्पितचित्तः - वीरः ।

17. (I) उत्तरानुसारं कोष्ठकात् उचितपदानि चित्वा पूरयत । (4)

( किमर्थं , कति , कुतः , कथम् )

प्रश्नः - भवान् - - - - - आगच्छति ?

उत्तरं - अहं नाटकशालातः आगच्छामि ।

प्रश्नः - नाटकं - - - - - आसीत् ?

उत्तरं - नाटकम् उत्तमम् आसीत् ।

प्रश्नः - तत्र - - - - नाटकानि आसन् ?

उत्तरं - पञ्च नाटकानि आसन् ।

प्रश्नः - नाटकं - - - - - आयोजितम् ?

उत्तरं - नाटकं धनसम्पादनार्थम् आयोजितम् ।

**अथवा**

(II) खण्डिकां पठित्वा जीवनरूपरेखां लिखत ।

**मेल्पुत्तूर नारायणभट्टपादः**

केरलदेशे लब्धजन्मा पण्डितश्रेष्ठः कविः वैयाकरणः च आसीत् मेल्पुत्तूर् नारायणभट्टपादः। केरलेषु निलानद्याः समीपे पोन्नानीदेशे चन्दनक्काव् नामके ग्रामे मेल्पुत्तूर् भवने तस्य जन्म अभूत् । अच्युतपिषारोटिः तस्य गुरुः आसीत् । प्रक्रियासर्वस्वम्, धातुकाव्यम्, किरातप्रबन्धः, नारायणीयम्, दक्षयागप्रबन्धः, पाञ्चालीस्वयंवरचम्पूः इत्यादयः तेन विरचिताः केचन प्रशस्ताः ग्रन्थाः भवन्ति ।

नाम - ...................................... ।

जन्म - ...................................... ।

गुरुः - ...................................... ।

ग्रन्थाः - ...................................... ।

** ** **